International Journal of Sanskrit Research 2023; 9(3): 172-174

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 172-174
© 2023 IJSR
www.anantaajournal.com
Received: 24-03-2023
Accepted: 30-04-2023

**Ganeswara Mahanta**
Ph.D., Research Scholar, Department of Sahityam, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Ganeswara Mahanta**
Ph.D., Research Scholar, Department of Sahityam, National Sanskrit University, Tirupati, Andhra Pradesh, India

# इन्द्राणीसप्तशतीस्तोत्रकाव्ये वासिष्ठगणपतिमुनेः राष्ट्रभक्तिवैभवम्

**Ganeswara Mahanta**

## प्रस्तावना

### स्तोत्रस्य व्युत्पत्तिः अर्थश्च

संस्कृतस्तोत्रसाहित्यम् अतीव विश्वालः सरसः तथा हृदयस्पर्शिः वर्तते । बहु प्राचीनकालदेव अस्मकातं क्रान्तदर्शिनः कवयः एतादृशानि महत्वपूर्णानि काव्यानि विरचयन्तः सन्ति । प्रत्येकधर्मे उपासकाः स्वहृदयस्य भावनामाराध्यदेवस्य समीपे प्रकाशयति । वस्तुतः स्तोत्रशब्दः संस्कृतस्य 'ष्टु' धातोः निष्पन्नः सन् नपुंसकलिंगे प्रयोगं भवति। स्तूयेऽनेनेति स्तोत्रम्[1] । शब्दस्तोवमहानिध्यानुसारं' गुणकर्मादिनां प्रशंसाय स्तोत्रशब्दस्य व्यवहृयते । यथा- 'स्तवे गुणकर्मादिभिःप्रशंसने'[2] । तथैव अमरसिंहस्य नामलिंगानुशासने गुणकर्मादिनां प्रशंसा स्तुतिः,स्तवनार्थे स्तोत्रमित्यस्य ग्रहणं भवति[3] ।

### स्तोत्रस्योत्पत्तिः

आचार्यमनुना मनुस्मुतौ उक्तं यत् - 'स सर्वोऽभितो वेदे सर्वज्ञाममयो हि सः[4]' अर्थात् वेदे एव सर्वमस्ति । अतः स्तोत्रस्योत्पत्तिः वेदे अभवत् । आस्माकं अमूल्यनिधिस्वरूपं ऋग्वेदे वहुलता स्तोत्रा प्रयोगः अस्ति । वेदेऽस्मिन् ऋषयः अग्नि-इन्द्र-वरुण-रुद्रप्रभृतामां देवानां स्वेष्टं प्राप्तये स्तवनं कृतवन्तः । तथैव लौकिकसंस्कृतसाहित्ये स्तोत्रप्रयोगस्य वैपुलतां दृश्यते । आदिकविः वाल्मीकिविरचितं रामायणे वर्णितं गङ्गास्तवनं आदित्यहृदयमस्तोत्रं च अतीव प्रसिद्धम् ।

---

1 शब्दकल्पद्रमः

2 शब्दस्तममहानिधिः तारानाथ भट्टाचार्यः सम्पादनम् चौखम्बा प्रकाशनम् -1967

3 स्तवःस्तोत्रः स्तुतिः – अमरकोशः -1/6/11

4 म.स्मु -2/7

लौकिकालानन्तरं कवयः अनेकानि सुप्रसिद्धानि स्तोत्रकाव्यानि रचितानि सन्ति। यथा पुष्पदनतस्य शिवमहिम्नस्तोत्रम्, मयूरभट्टस्यसूर्यशतकम्, वाणभट्टस्य चण्डिशतकम्, शङ्कराचार्यस्य शिवापराधक्षमापणस्तोत्रम्, देव्यपराधक्षमापणस्तोत्रम्, चर्पटपञ्चरिकास्तोत्रम्, आनन्दलोहरी, अम्बाष्टकम्[5] ।

**वासिष्ठगणपतिमुनेः परिचयः**

एतस्य महाकवेः जन्मः 1878 तमवर्षे नवाम्बरमासस्य सप्तदशदिनाङ्के आन्ध्रप्रदेशस्य विशाखापतनमण्डलस्य कलुवराई इति ग्रामे अभवत् । तस्य पिता नरसिंहशास्री माता नरसम्बा आसीत् । श्रीविद्यादीक्षावतां वंशे जातः अयं मुनिः असाधारणः मनिषी आसीत् । यस्य व्याकरणे,तर्के,ज्योतिशास्रे,आयुर्वेदे, अलङ्कारशास्रे च प्रगादं ज्ञानमासीत् । तथैव एतस्य कवेः उपोरक्तं शास्राणां प्रति अवदानमतुलनीयमस्ति । मुनिना यत् किमपि रचितं तान् सर्वान् संस्कृतभाषायमेव रचितम् । अयं महातपस्वी तदानीमेवकाले वङ्गालस्थः नवद्वीपे विद्युत्परिषदे स्वपाड्णित्येन एकविंशति वयसि 'काव्यकण्ठः' इति उपाधिना भूषितमासीत्[6] ।

**मुनेः इन्द्राणीसप्तशती**

वासिष्ठगणपतिमुनेः संस्कृतकृतिषु इन्द्राणीसप्तशती एकं सुप्रसिद्धं स्तोत्रकाव्यमस्ति । वैदिकसाहित्ये वर्णितेषु देवेषु देवराजः इन्द्रः श्रेष्ठः एव । इन्दस्य पत्नी महापराक्रमशालिनी एषा इण्द्राणी देवी वेदपुराणेषु इन्द्रवधुः,मघोवानी,शची, शतावरी,पोलोमी इति नामाभिः परिचितमस्ति । एषा इन्द्रदेवस्य शक्तिप्रदायिनी तथा स्वयमेव वहूनां वैदिकं ऋचानां ऋषिः अस्ति ।

एतस्य स्तोत्रकाव्यस्य रचनासमयः स्वतन्त्रतापूर्वसमयः आसीत् । वासिष्ठगणपतिमुनिः दृष्टवान् भारतमातुः परधिनतायाः दूखम् । मातुः कृपां विना मुक्तिः नास्ति इति विश्वासेन भक्त्या च सर्वशक्तिमयी देवीन्द्राणीं भारदेशस्य रक्षणार्थं गतवैभवस्य प्राप्तये च काव्येऽस्मिन् पुनः पुनः स्तुति कृतवान् ।

**इन्द्राणीसप्तशती स्तोत्रकाव्ये राष्ट्रभक्तिवैभवम्**

महान् राष्ट्रभक्तः तपस्विः गणपतिमुनेः राष्ट्रभक्तिवैभवं तेन रचितं इन्द्राणिसप्तशती-स्तोत्रकाव्ये अनेन प्रकारेण प्राप्यते –

वासिष्ठगणपतिमुनिः दृष्टवान् भारतमातुः पराधिनतायाः दुःखम् । भारतमातुः रक्षणार्थं गतबैभस्य प्राप्तये च शचीदेवीमनेन प्रकारेण काव्येऽस्मिन् स्तुयते -

अगतिमवीर्यामगतधैर्याम् ।
अवतु शचि मे जनिभुवमार्याम्[7]।।

हे शचीदेवी । देवराजेन्द्रस्य भूजायां स्थित्वा त्वं समग्रं संसारं पालयति । मम जन्मार्यभूमिः इदानीं असहाय-वलहीना अस्ति, अतः अस्याः रक्षणं कुरु ।

भीताम् अरिभूतामार्यावनिमेताम् ।
सम्राज्ञि बुधानां दूनामव दीनाम्[8]।।

हे देवी ,सर्वेषां ज्ञानिनां सार्वभौममात । सर्वबुद्धिमान् आर्यजनानां एतां भूमिं तारयितुं दयालुः भवः, इदानीं शत्रबलैः कम्पितसन् भीरुः,दीनः, दुखितश्च अभवत् ।

विश्वं वहसीदं जम्भारिभुजस्था ।
आर्यान्वह मातार्वसिष्ठमतिस्था[9] ।।

हे देवी शची । त्वं अतीव स्नेहेन इन्द्रभूजायां स्थित्वा जगदिदं शासनं करोति । दृध मनसा अहं तव स्तुतिं करोमि । कृपया भारमातुः सन्तानान् पालयतु इति ।

[5] संस्कृत साहित्य का इतिहास, डा.उमाशङ्कर शर्माऋषि, पृष्ठा -363-365

[6] काव्यकण्ठगणपतिमुनिवरः- गिरीषा पब्लिकेशन्स्- मद्रास्, पृष्ठा- 16

[7] इ.स -2

[8] इ.स-27

[9] इ.स-49

इन्द्राण्याः करुणालोकाश्शोकहृतः ।
भूयासूर्भरतक्ष्मायै क्षेमकृतः [10]।।

हे माता। तव करुणया सर्वेभ्यः दुखकष्टेभ्यः मुक्तिः प्रदायतु ।मम एषा प्रार्थना तव दृष्टिः भारतभूमेः सुरक्षार्थं सुसमृद्धयेश्च भवतु इति ।

शक्तां देविविधेह्यार्तानामवने ।
इन्द्रस्येव भुजां वासिष्ठस्य मतिम् [11]।।

हे सर्वशक्तिमयी देवी । अस्य भारतभूमौ पतिताः पीडिताः बालानां उद्धारकार्ये मम मनोवलं इन्द्रभूजा इव वज्रं पराक्रमशीलं करोतु ।
वासिष्ठगणपति मुनेः इन्द्राणीसप्तशती स्तोत्रकाव्यस्य उपरस्थान् श्लोकेषु मुनिवरयस्य चिन्तनं पश्यन्तु । भारतमातुः रक्षणार्थं सर्वशक्तीमयी देवीं इन्द्राणीं न केवलं वारं वारं प्रार्थयति, अपितु राष्ट्रस्य रक्षणे स्वस्य मनोवलं वृद्धिनिमित्तमपि नेवेदयति । वेदमर्मज्ञः वासिष्ठगणपतिमुनिः ज्ञातवान् परतन्त्रस्य पर्वं भारतस्य सुखं वैभवम् कियत् समृद्धमयम् आसीत् । माता भूमिः पुत्रो अहं पृथिव्याः[12] । इति वेदवाक्यानुसारं पुत्रत्वेन मातृभूमेः भारतस्य सुरक्षार्थं विचलितं भवति । एतदेव एकस्य पुत्रस्य प्रधानकर्तव्यास्ति ।

## उपसंहारः

अयं महान् कविः राष्ट्रभक्तः वासिष्टगणपतिमुनिः परतन्त्रपूर्व भारतस्य वैभवं ज्ञातवान् आसीत् । परन्तु परतन्त्रानन्तरं देशे या दुरावस्था आगता अकथनीयमेव । राष्ट्रस्य स्वतन्त्रता केनप्रकारेण भविष्यति अयं मुनिः सर्वदा चिन्तयति स्म । मुनेः इन्द्राणीसप्तशतीस्तोत्रकाव्ये तस्य राष्ट्रभक्तिवैभवं ज्वलन्तं निदर्शनमेव । साप्रतिकजगति जनाः कदापि समाज-राष्ट्रविषये न चिन्तयन्ति । स्वस्वार्थे लिप्तसन् जीवन्ति एव । अस्मात् कारणात् राष्ट्रे अराजकता, राष्ट्रद्रोहादि च दृश्यते ।
अतः इन्द्राणीसप्तशतीस्तोत्रकाव्ये वासिष्ठगणपतिमुनेः राष्ट्रभक्तिवैभवमिति शोधपत्रं मया निर्मितम् ।मम शोपत्रस्य उद्येश्यमस्ति यत् जनमानसेषु राष्ट्रभक्तिः जागरणम् ।

## सन्दर्भ

1. म.स्मु – मनुस्मुति
2. इ.स – इन्द्राणीसप्तशती
3. अ.वे – अथर्वेद
4. सहायकग्रन्थसूचिका -
5. शब्दकल्पद्रमः
6. शब्दस्तममहानिधिः तारानाथ भट्टाचार्यः सम्पादनम् चौखम्बा प्रकाशनम् -
7. अमरसंहस्य - अमरकोशः
8. मनुस्मुतिः
9. संस्कृत साहित्य का इतिहास, डा.उमाशङ्कर शर्मात्रृषि
10. इन्द्राणीसप्तशतीस्तोत्रकाव्यम्
11. काव्यकण्ठगणपतिमुनिवर

[10] इ.स-49
[11] इ.स-52
[12] अ.वे -12/1/12